मित्रयुद्धं, क्ली, ( मित्रेण सह युद्धम् । ) सुहृत्संग्रामः । तत्पर्य्यायः । मैत्रेयिका २ । इति त्रिकाण्डशेषः ॥

मित्रलब्धिः, } स्त्री, पुं, ( मित्रस्य लब्धिः । यद्वा । मित्रलाभः, } मित्रस्य लब्धिर्यस्मात् । ) सुहृत्प्राप्तिः । यथा, हितोपदेशे ।
"मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ॥"

मित्रवत्सलः, त्रि, ( मित्रस्य मित्रे वा वत्सलः । ) मित्रप्रियः । तत्पर्य्यायः । मित्रयुः २ । इति हेमचन्द्रः ॥

मित्रशीः, [ स् ] त्रि, ( मित्रं शास्ति इति । शास् + "शास इदङ्हलोः ।" ६ । ४ । ३४ । इत्यत्र "क्वौ च शास इत्वं भवतीति वक्तव्यम् ।" इति काशिकोक्तेः क्विप् इत्वं ततो दीर्घश्च । ) सुहृच्छास्ता । मित्रं शास्ति यः । इति मुग्धबोधव्याकरणम् ॥

मित्रसप्तमी, स्त्री, (मित्राय मित्रजन्मने मित्रस्य वा सप्तमीति समासः ।) मार्गशीर्षशुक्लसप्तमी । यथा,—
"अदितेः काश्यपाज्जज्ञे मित्रो नाम दिवाकरः । मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ ॥ सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी । तत्रोपवासः कर्त्तव्यो भक्ष्याण्यथ फलानि वा ॥"
इति श्रीगोविन्दानन्दाचार्य्यकृतसंवत्सरकौमुदीधृतभविष्यपुराणवचनम् ॥

मित्रा, स्त्री, ( मित्र + स्त्रियां टाप् । ) सुमित्रा । शत्रुघ्नजननी । इति शब्दरत्नावली ॥ (अप्सरोविशेषः । यथा, महाभारते । १३ । १९ । ४४ ।
"अलम्बुषा घृताची च मित्रा चित्राङ्गदा रुचिः ॥"
पराशरशिष्यमैत्रेयजननी । यथा, श्रीमद्भागवते । ३ । ४ । ३५ ।
"कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ ! । पापच्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥")

मिथ ऋ ञ वधे । मेधायाम् । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०-सेट् । ) ऋ अमिमेथत् । ञ मेथति मेथते शास्त्रार्थं शिष्यः धारयतीत्यर्थः । इति दुर्गादासः ॥

मिथः, [ स् ] व्य, (मेथति इति मेथृ सङ्गमे असुन् । पृषोदरादित्वात् ह्रस्वः । ) अन्योन्यम् । रहः । इत्यमरः ।३।४।२५५॥ (यथा, मनुः ।१०।५३ ।
"व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥")

मिथिः, पुं, (मेथते हिनस्ति शत्रुकुलं इति । मिथ् + "सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) निमिराजपुत्त्रः । स तु जनकराजः । यथा । अपुत्त्रस्य तस्य निमेर्भूभुजः शरीरमराजकभीरवस्ते मुनयः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जननाज्जनकसंज्ञां चावाप । अभूद्विदेहोऽस्य पितेति वैदेहः । मथनान्मिथिरभूत् । तस्योदावसुः पुत्त्रोऽभवत् । इति विष्णुपुराणे ४ अंशे ५ अध्यायः ॥ ( तथाच रामायणे । १ । ७१ । ४ ।
"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः । तस्य पुत्त्रो मिथिर्नाम जनको मिथिपुत्त्रकः ॥")

मिथिला, स्त्री, (मथ्यन्ते शत्रवो यस्याम् । मथ् + "मिथिलादयश्च" उणा० १ । ५८ । इति इलच् अकारस्येत्वं निपात्यते । ) स्वनामख्यातनगरी । सा तु जनकराजपुरी । यथा । विदेहा मिथिला प्रोक्ता । इति हलायुधः ॥ (यथा, महाभारते । १ । ११३ । २८ ।
"ततः कोषं समादाय वाहनानि च भूरिशः । पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः ॥")
अपि चास्य निरुक्त्यादिकं यथा,—
"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे ! । विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः । तैरभुक्ता त्रिहुत इति ख्याता ॥ तन्नामकारणं यथा,—
"अराजकभयं नॄणां मन्यमाना महर्षयः । देहं ममन्थुः स्म निमेः कुमारः समजायत ॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः । मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता ॥"
इति श्रीमद्भागवते ९ स्कन्धे १३ अध्यायः ॥
अपि च ।
"निमेः पुत्त्रस्तु तत्रैव मिथिर्नाम महान् स्मृतः । प्रथमं भुजबलैर्येन तैरहूतस्य पार्श्वतः । निर्म्मितं स्वीयनाम्ना च मिथिलापुरमुत्तमम् ॥ पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः ॥"
इति भविष्यपुराणम् ॥

मिथुनं, क्ली, ( मेथतीति । मिथ् + "क्षुधिपिशिमिथिभ्यः कित् ।" उणा० ३ । ५५ । इति उनन् कित्त्वाद्गुणाभावश्च । ) स्त्रीपुंसयोर्युग्मम् । तत्पर्य्यायः । द्वन्द्वम् २ । इत्यमरः ।२। ५ । ३८ ॥ ( यथा, रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥") युगलम् । इति तट्टीकायां रामाश्रमः ॥ मेषादिद्वादशराश्यन्तर्गततृतीयराशिः । तत्पर्य्यायः । जितुमः २ । तच्च द्विपदं ग्राम्यं समसंज्ञकम् । अस्योदयस्य स्थूलमानं षट्पलाधिकपञ्चदण्डाः । इति ज्योतिस्तत्त्वम् ॥ अस्याधिष्ठातृदेवता गदाधारिपुरुषः वीणाधारिस्त्री च । मृगशिरःशेषार्द्धं आर्द्रासमुदायः पुनर्व्वसोस्त्रिपादं एतैर्भवति । तत्तु शीर्षोदयं पश्चिमदिक्स्वामिवायुप्रकृतिहरिद्वर्णं वनस्थितं शूद्रवर्णं स्निग्धं मध्यस्त्रीसङ्गं मध्यमसन्तानञ्च । तत्र जातो जनः मृगचक्षुः मिष्टभाषी कृशः वञ्चकः धर्म्ममतिः विनयभाजनञ्च भवति । इति वृहज्जातकादयः ॥ अथ मिथुनलग्नजातफलम् ।
"मिथुनोदयसंजातो मानी स्वजनवत्सलः । त्यागी भोगी धनी कामी दीर्घसूत्रोऽरिमर्द्दनः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
रात्रौ तल्लग्ननिरूपणं यथा,—
"हस्तसंस्थभवने भसाङ्गता-
स्तमे लसदनन्तमध्यगे ।
कोमलाङ्गि ! मिथुनोदयात् प्रिये !
कालखानलकलाः प्रियेऽत्वलन् ॥" ५ । ६ ।
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

मिथ्या, व्य, ( मथति इति । मथ विलोडने । मेथति हिनस्ति वेति । मथ वा मेथ + क्यप् । निपातनात् साधुः ।) असत्यम् । तत्पर्य्यायः । मृषा २ वितथः ३ अनृतम् ४ । इति शब्दरत्नावली ॥ मिछा इति भाषा ॥ ( यथा,—
"यद्सद्भासमानं तन्मिथ्या स्वाप्नगजादिवत् ।"
इति सांख्यप्रवचनभाष्यधृतम् ॥
सा चाधर्म्मपत्नी । यथा,—
"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता । यया विना जगन्नष्टमुच्छन्नं विधिनिर्म्मितम् ॥ सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी । अर्द्धावयवरूपा च द्वापरे संवृता भिया ॥ कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका बलात् । कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥
अपि च ।
"अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना । तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः ॥ स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम् । निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥"
इति कल्किपुराणे १ अध्यायः ॥
विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—
शर्म्मिष्ठोवाच ।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"
मिथ्याकथने दोषो यथा,—
"पृष्टास्तु साक्ष्ये प्रवदन्ति येऽन्यथा
भवन्ति मिथ्यापतिता नरेन्द्र ! ।
एकार्थतायान्तु समाहितायां
मिथ्या वदन्तं ह्यनृतं हिनस्ति ॥"
ययातिरुवाच ।
"राजा प्रमाणं भूतानां स विनश्येन्मृषा वदन् । अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे ॥"
इति मात्स्ये ३१ अध्यायः ॥
अथासत्याभिधानप्रायश्चित्तम् । तत्र सकृदसत्यभाषणे कृष्णानुस्मरणं प्रायश्चित्तम् । यथा, विष्णुपुराणम् ।
"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तन्तु तस्यैकं कृष्णानुस्मरणं परम् ॥"
अत्यन्ताभ्यासे विष्णुः । निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम् । असत्यभाषणं शूद्रसेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति । अतिबहुतरकालाभ्यासे मनुः ।
"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम् ।"